न विष्णुभागवते तच्छन्दोऽस्ति मुख्यार्थसम्भवे गायत्रीपदस्य लक्षणया धीमहीत्यर्थकरणेन विष्णुभागवतपरत्वकल्पनमस्य वचनस्य तु साहसमेव। क्वचित्पुराणेषु यदि तादृशान्येव विष्णुभागवतपराणि वचनानि सन्ति। तत्र गत्यन्तराभावादस्तु लक्षणा। उदासीने मात्स्यवाक्ये तु मुख्यविषयसम्भवे सानपेक्षा। यद्यप्याधुनिकपुस्तकेषु क्वचिदेतत्स्वरगश्लोकोऽपि दृश्यते तथापि सम्प्रदायां गुणवतीटीकाकारादिभिश्छिपातृश्लोकस्यैव व्याख्यातत्वेन स एव साम्प्रदायिकः पाठ इति बोध्यम्। यत्तु गायत्र्यर्थश्च विष्णुध्यानं न तु शिवशक्तिसूर्य्यादिध्यानमित्युक्तं तत्तु नास्तिकत्वमूलकमेव।
"मैत्रायणीयानां भर्गो वै रुद्रः।" इति श्रुतौ प्रपञ्चसारादिसर्व्वतन्त्रेषु पुराणादिषु च शिवसूर्य्यशक्त्यादिरूपार्थस्योक्तत्वाच्च तदुदाहृतमाग्नेयवाक्यन्तु विरोधत्वे नापेक्षं स्यादसति ह्यनुमानमिति न्यायात् स्तावकमेवेति। किञ्च।
"हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा।
गायत्र्या च समारम्भस्तद्वै भागवतं विदुः॥"
इति पुराणान्तरवाक्यमपि देवीभागवतस्यैव महापुराणत्वबोधकम्। तथा हि हयग्रीवनामासुरो देवीभागवते प्रथमस्कन्धे प्रसिद्धस्तेनोपासिता ब्रह्मप्रतिपादिका विद्या स्त्रीदेवत्यो मन्त्रः। सा विद्या यत्र वर्त्तते तद्भागवतमित्यर्थः। स दैत्यस्तदुपासिता विद्या चेत्युभयमपि तत्रैव प्रथमस्कन्धे दर्शितम्।
"जपन्नेकाक्षरं मन्त्रं मायाबीजात्मकं मम॥"
इत्यादिना॥
ननु विष्णुभागवते पञ्चमस्कन्धेऽपि हयग्रीवमन्त्रस्य सत्त्वादिदं वचनमुभयभागवतसाधारणमिति चेन्न। नारदीये शारदातिलकादिनिबन्धेषु च।
"मन्त्राः पुंदेवताः प्रोक्ता विद्याः स्त्रीदेवताः स्मृताः॥"
इत्यादिवचनैः स्त्रीदैवत्यमन्त्रेष्वेव विद्यापदप्रयोगो न पुंदैवत्यमन्त्रेष्विति प्रतिपादनात्। क्वचित् पुंदैवत्यमन्त्रे तथाप्रयोगस्तु गौणः। न च गौणार्थमादाय तद्वचनस्य विष्णुभागवतपरत्वं कल्पयितुमुचितम्। लक्षणारूपदोषापत्तेः। तस्मान्न तद्वचनमुभयसाधारणमिति देवीभागवतस्यैव महापुराणत्वं बोधयति। किञ्च सारस्वतस्य अस्येति मात्स्यवचनादपि देवीभागवतमेव महापुराणम्। अत्र ह्येवं प्रकरणशुद्धिः।
ऋषय ऊचुः।
"पुराणसंख्यामाचक्ष्व सूत! विस्तरतः क्रमात्।"
इति मुनिप्रश्नोत्तरं ब्रह्मणाऽभिहितं पूर्व्वं यत्तदुक्तं पद्मकल्पवृत्तान्ताश्रयं पाद्मं वराहकल्पवृत्तान्ताश्रयं वैष्णवं श्वेतकल्पवृत्तान्ताश्रयं वायवीयमित्येवं तत्तत्कल्पवृत्तान्ताश्रयाणि पुराणान्युक्त्वा तदुत्तरम्।
"यत्राधिकृत्य गायत्रीं वर्ण्यते धर्म्मविस्तरः।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते॥" इति॥
"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः।
तद्वृत्तान्तोद्भवं लोके तद्भागवतमिष्यते॥"
इत्युक्त्वा ततोऽन्यान्यपि महापुराणान्येव तत्तत्कल्पवृत्तान्ताश्रयाणि दर्शितानि। पश्चादुपपुराणकथनार्थमुपभेदान् प्रवक्ष्यामीति प्रतिज्ञाय पद्मपुराणान्नारसिंहं निर्गतमेवं नन्दिसाम्बादित्यसंज्ञकान्युक्त्वा अन्योपपुराणान्यपि महापुराणेभ्य एव निर्गतानीति।
"अष्टादशभ्यस्तु पृथक् पुराणं यत् प्रदृश्यते।
विजानीध्वं द्विजश्रेष्ठास्तदा तेभ्यो विनिर्गतम्॥"
इति वचनेन सूतऋषिरुक्तवान्॥ ततः।
"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च॥"
इत्यादिना पुराणलक्षणान्युक्त्वा,—
"सात्त्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः।
राजसेषु च कल्पेषु माहात्म्यं ब्रह्मणो विदुः।
तद्वदग्नेश्च माहात्म्यं तामसेषु शिवस्य च।
सङ्कीर्णेषु सरस्वत्याः पितॄणां च निगद्यते॥"
इति वचनेन पुराणप्रतिपाद्यहरिब्रह्माग्निहरसरस्वतीपितॄणां माहात्म्यसम्बन्धात् कल्पानां सात्त्विकराजसतामसत्वसङ्कीर्णत्वभेदेश्चातुर्विध्यत्वमुक्तवानिति। तत्र कल्पानां तत्तद्देवतासम्बन्धज्ञानन्तु तत्तत्कल्पाश्रिततत्तत्पुराणप्रतिपाद्यमुख्यदेवताज्ञानेनैव बोध्यम्। अन्यप्रकारस्य क्वचिदपि पुराणेष्वनुपलम्भात्तत्रैवं सति।
"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः।
तद्वृत्तान्तोद्भवं लोके तद्भागवतमिष्यते॥"
इति वचनं भागवतस्य लक्षणप्रतिपादकं प्रतिपादितम्। तदर्थस्तु यथा गारुडकल्प इत्यत्र गरुडस्यायं गारुडः। यथा वा वाराहकल्प इत्यत्र वराहस्यायं वाराह इति व्युत्पत्तिः प्रसिद्धा। तद्वदेव सरस्वत्या अयं सारस्वत इति विग्रहः।
"सरस्वत्यास्तथा कल्पो गौरीकल्पस्तथैव च॥"
इति कल्पनामसु सरस्वतीकल्पत्वेनैव कथितत्वाच्च। मत्स्यपुराणे उपान्त्याध्याये।
"सङ्कीर्णेषु सरस्वत्याः पितॄणां कल्प उच्यते॥"
इति वचनेन तथैवोक्तत्वाच्च ब्रह्मविष्णुरुद्राग्निकल्पवद्गौरीलक्ष्म्योः कल्पवच्च सरस्वतीकल्पस्यार्थप्राप्तत्वाच्च तादृशसारस्वतकल्पसम्बन्धिनो ये देवमनुष्यास्तद्वृत्तान्तस्योद्भव उत्पत्तिर्यस्मात् तत्पुराणं भागवतं विदुः। तद्वृत्तान्तप्रदर्शकं यत् पुराणं तद्भागवतसंज्ञकमिति यावत्। अत्र च तत्तद्देवतानामाविर्भावाश्रया ये ये कल्पास्ते तत्तन्नाम्ना व्यवह्रियन्ते। एतच्च तत्तन्नामककल्पाश्रितेषु पुराणेषु तत्तद्देवताया एव मुख्यत्वेनोत्पत्तिप्रदर्शकवाक्यैर्लक्ष्मीकल्पादिकल्पाश्रितकूर्म्मपुराणादिषु सर्व्वत्र प्रसिद्धमेव। तथा च मुख्यत्वेन सरस्वत्या आविर्भावप्रतिपादकं पुराणं यत् तद्भागवतमित्यतिरहस्यार्थः। तत्र सारस्वतकल्प इति पदेनैव कल्पस्य सरस्वतीसम्बन्धे बोधिते तस्य सङ्कीर्णत्वं सङ्कीर्णेषु सरस्वत्या इति वचनेनेश्वरप्रेरणां विनापि गृहागतमेव। अस्मिंश्च वचने भागवतपदेन विष्णुभागवतस्य ग्रहणं वन्ध्यापुत्रोपममेव। तत्र मुख्यत्वेन सरस्वत्याविर्भावस्यासत्त्वात्। विष्णुभागवते द्वितीयस्कन्धे। "पाद्मं कल्पमथो शृणु।" इति वचनेन स्वमुखेनैव स्वस्य पाद्मकल्पकथाश्रयत्वस्योक्तत्वात्। तद्विरोधाच्च न च पाद्मकल्प एव सारस्वतः। सरस्वान् समुद्रस्तस्माज्जातं कमलं सारस्वतं तस्य कल्प इति व्युत्पत्त्येति वाच्यम्।
"पद्मकल्पस्य वृत्तान्तं तत्र यस्मादुदाहृतम्।
तस्मात् पाद्मं समाख्यातम्॥"
इति पूर्व्वोदाहृतशिवपुराणवचनेन।
"एतदेव यदा पाद्ममभूद्धैरण्मयं जगत्।
तद्वृत्तान्ताश्रयं तद्वत् पाद्ममित्युच्यते बुधैः॥
पाद्मं तत् पञ्चपञ्चाशत्सहस्राणीह कथ्यते॥"
इति मत्स्यपुराणवचनेन।
"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः।"
इति वचनेन च पाद्मकल्पसारस्वतकल्पयोः पृथक्कथनात्। किञ्च सारस्वतकल्पपाद्मकल्पयोरेकत्वे पद्मकल्पस्य प्रतिपादकं पुराणद्वयं पाद्मं भागवतञ्चेत्येव वदेत् किञ्च पद्मकल्पस्य वृत्तान्तमित्यत्राभियुक्तपदार्था ये स्वतन्त्रा लोकविश्रुता इति न्यायेन पूर्व्वं बुद्ध्यारूढं प्रसिद्धं पाद्मशब्दं विहायाप्रसिद्धं सारस्वतशब्दं पाद्मशब्दस्य वाचकं कृत्वा सारस्वतपदघटितकल्पने प्रयोजनाभावः। किञ्च सरस्वत्यास्तथा कल्प इत्यादेः। पूर्व्वोक्तस्य सारस्वतपदनिरुक्त्यर्थकस्य वचनसमूहस्य विरोधश्च। न च पाद्मकल्पसारस्वतकल्पयोः पृथक्त्वे त्रिंशत्कल्पेषु मत्स्यपुराणान्तिमाध्याये कीर्त्तितेषु सारस्वतपदेन पाद्मस्य ग्रहणं न स्यादिति वाच्यम्। प्रभासखण्डे त्रिंशत्कल्पेषु विष्णुजकल्पाद्यैश्चकल्पसमुमानृकल्पानां ग्रहणेऽपि तेषां कल्पानां यथा मात्स्यान्तिमाध्याये न ग्रहणं तथा पाद्मस्यापि न ग्रहणमित्यस्य तुल्यत्वात्। यदि तेषां पर्य्यायत्वेन कुत्रचिदन्तर्भावः क्रियते तर्ह्यस्यापि कुत्रचिदन्तर्भावोऽस्तु अतएव विष्णुभागवतस्य प्रबन्धटीकाकारेण पितृकल्पे एव पूर्व्वार्द्धान्ते पद्मस्योद्भवात् पितृकल्पपदेन पाद्मसंग्रहो वेदितव्य इत्युक्तम्। पुराणकल्पकथनप्रस्तावे सारस्वतकल्पपाद्मकल्पयोः पृथक्करणेन सारस्वतपदेन पाद्मस्य सर्व्वथा न ग्रहणम्। वस्तुतस्तु त्रिंशत्कल्पा ब्रह्मणस्त्रिंशत्तिथ्यात्मकाः त्रिंशत्तिथिषु प्रतिपदादिषूत्पद्यन्ते। भूर्भुवःस्वः भूर्भुवःस्व इत्यादयस्त्रयस्त्रिंशत्कल्पाः। पाद्मादयश्च वायुपुराणोक्ता दिनकल्पा ब्रह्मणः प्रतिदिवसेषूत्पद्यन्ते इति दिनकल्पतिथिकल्पानां सुतरां भेदात्तिथिकल्पेषु दिनकल्पानां पाद्मादीनां न ग्रहणमिति सिद्धान्तः।
यत्तु विष्णुभागवतस्यारम्भतः पाद्मकल्पाश्रयत्वेऽपि ब्रह्माण्डखण्डस्यैव सारस्वतकल्पभवत्वेन तस्य च दशमस्कन्धे सत्त्वात्।